# <u>अच्युताष्टकम्</u>

<u>Ragam- Pantuvarali ; Thalam – Adi, Tishra gati</u>

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।

श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे॥ १॥

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम्।

इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं सन्दधे॥ २॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये।

वल्लवीवल्लभायाऽर्चितायात्मने कंसविध्वंसिने वंशिने ते नमः॥ ३॥

कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे।

अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक॥ ४॥

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः।

लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसम्पूजितो राघवः पातु माम्॥ ५॥

धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंस हृद्वंशिकावादकः।

पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु माम् सर्वदा॥ ६॥

विद्युदुद्योतवत्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्।

वन्यया मालया शोभितोरःस्थलं लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे॥ ७॥

कुञ्चितैः कुन्तलैर्भ्राजमानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः।

हारकेयूरकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे॥ ८॥

अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम्।

वृत्ततः सुन्दरं कर्तृविश्वम्बरं तस्य वश्यो हरिर्जायते सत्वरम्॥ ९॥

acyutaṁ keśavaṁ rāmanārāyaṇaṁ kṛṣṇadāmodaraṁ vāsudevaṁ harim |
śrīdharaṁ mādhavaṁ gopikāvallabhaṁ jānakīnāyakaṁ rāmacandraṁ bhaje 1||
acyutaṁ keśavaṁ satyabhāmādhavaṁ mādhavaṁ śrīdharaṁ rādhikārādhitam |
indirāmandiraṁ cetasā sundaraṁ devakīnandanaṁ nandajaṁ sandadhe || 2||
viṣṇave jiṣṇave śaṅkhine cakriṇe rukmiṇīrāgiṇe jānakījānaye |
vallavīvallabhāyā'rcitāyātmane kaṁsavidhvaṁsine vaṁśine te namaḥ || 3||
kṛṣṇa govinda he rāma nārāyaṇa śrīpate vāsudevājita śrīnidhe |
acyutānanta he mādhavādhokṣaja dvārakānāyaka draupadīrakṣaka || 4||
rākṣasakṣobhitaḥ sītayā śobhito daṇḍakāraṇyabhūpuṇyatākāraṇaḥ |
lakṣmaṇenānvito vānaraiḥ sevito'gastyasampūjito rāghavaḥ pātu mām || 5||
dhenukāriṣṭako'niṣṭakṛddveṣiṇāṁ keśihākaṁsahṛdvaṁśikāvādakaḥ |
pūtanākopakaḥ sūrajākhelano bālagopālakaḥ pātu mām sarvadā || 6||
vidyududyotavatprasphuradvāsasaṁ prāvṛḍambhodavatprollasadvigraham |
vanyayā mālayā śobhitoraḥsthalaṁ lohitāṅghridvayaṁ vārijākṣaṁ bhaje |
kuñcitaiḥ kuntalairbhrājamānānanaṁ ratnamauliṁ lasatkuṇḍalaṁ gaṇḍayoḥ |
hārakeyūrakaṁ kaṅkaṇaprojjvalaṁ kiṅkiṇīmañjulaṁ śyāmalaṁ taṁ bhaje || 8||
acyutasyāṣṭakaṁ yaḥ paṭhediṣṭadaṁ premataḥ pratyahaṁ pūruṣaḥ saspṛham |
vṛttataḥ sundaraṁ kartruviśvambaraṁ tasya vaśyo harirjāyate satvaram || 9||

அச்யுதம் கேஶவம் ராமநாராயணம்
க்ரு'ஷ்ணதா$^{3}$மோத$^{3}$ரம் வாஸுதே$^{3}$வம் ஹரிம்
ஶ்ரீத$^{4}$ரம் மாத$^{4}$வம் கோ$^{3}$பிகாவல்லப$^{4}$ம்
ஜாநகீநாயகம் ராமசந்த்$^{3}$ரம் ப$^{4}$ஜே॥ 1॥

அச்யுதம் கேஶவம் ஸத்யபா$^{4}$மாத$^{4}$வம் மாத$^{4}$வம் ஶ்ரீத$^{4}$ரம் ராதி$^{4}$காராதி$^{4}$தம்।
இந்தி$^{3}$ராமந்தி$^{3}$ரம் சேதஸாஸுந்த$^{3}$ரம் தே$^{3}$வகீநந்த$^{3}$நம் நந்த$^{3}$ஜம் ஸந்த$^{3}$தே$^{4}$॥ 2॥

விஷ்ணவே ஜிஷ்ணவே ஶங்கி$^{2}$நே சக்ரிணே ருக்மிணிராகி$^{3}$ணே ஜாநகீஜாநயே।
வல்லவீவல்லபா$^{4}$யாऽர்சிதாயாத்மநே கம்ஸவித்$^{4}$வம்ஸிநே வம்ஶிநே தே நம: ॥ 3॥

க்ரு'ஷ்ண கோ$^{3}$விந்த$^{3}$ ஹே ராமநாராயண ஶ்ரீபதே வாஸுதே$^{3}$வாஜித ஶ்ரீநிதே$^{4}$।
அச்யுதாநந்த ஹே மாத$^{4}$வாதோ$^{4}$க்ஷஜ த்$^{3}$வாரகாநாயக த்$^{3}$ரௌபதீ$^{3}$ரக்ஷக॥ 4॥

ராக்ஷஸக்ஷோபி4த: ஸீதயாஶோபி4தோ
த3ண்ட3காரண்ய-பூ4புண்யதாகாரண: ।
லக்ஷ்மணேநாந்விதோ வாநரை: ஸேவிதோ-
ऽக3ஸ்த்ய-ஸம்பூஜிதோ ராக4வ: பாது மாம் ॥ 5 ॥

தே4நுகாரிஷ்டகோ-ऽநிஷ்டக்ரு’த்3-த்3வேஷிணாம்
கேஶிஹா-கம்ஸஹ்ரு’த்3-வம்ஶிகா-வாத3க: ।
பூதநாகோபக: ஸூரஜாகே2லநோ
பா3லகோ3பாலக: பாது மாம் ஸர்வதா3 ॥ 6 ॥

வித்3யுது3த்3யோதவத்-ப்ரஸ்பு2ரத்3வாஸ-ஸம்-
ப்ராவ்ரு’ட3ம்போ4த3வத்-ப்ரோல்லஸத்3-விக்3ரஹம் ।
வந்யயாமாலயா ஶோபி4தோர:ஸ்த2லம்
லோஹிதாங்க்ரித்3வயம் வாரிஜாக்ஷம் ப4ஜே ॥ 7 ॥

குஞ்சிதை: குந்தலைர்-ப்4ராஜமாநாநநம்
ரத்நமௌலிம் லஸத்குண்ட3லம் க3ண்ட3யோ: ।
ஹாரகேயூரகம் கங்கணப்ரோஜ்ஜ்வலம்
கிங்கிணீமஞ்ஜுளம் ஶ்யாமலம் தம் ப4ஜே ॥ 8 ॥

அச்யுதஸ்யாஷ்டகம் ய: படே2தி3ஷ்டத3ம்
ப்ரேமத: ப்ரத்யஹம் பூருஷ: ஸஸ்ப்ரு’ஹம் ।
வ்ரு’த்தத: ஸுந்த3ரம் கர்த்ரு’விஶ்வம்ப3ரம்
தஸ்ய வஶ்யோ ஹரிர்ஜாயதே ஸத்வரம் ॥ 9 ॥